Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# नवग्रहेषु कुजः

डॉरामदासशर्मा.
ज्योतिषविभागाध्यक्ष, ज्योतिषविभागः, के श्रीरणवीर परिसर .वि.वि.सं.,जम्मू

**Article Info**
Volume 6, Issue 6
**Page Number :** 174-181
**Publication Issue :**
November-December-2023
**Article History**
Accepted : 10 Dec 2023
Published : 30 Dec 2023

**शोधसारांशः-** नवग्रहेषुस्थितः भौमः एवविष्णोः नृसिंहावतारः स्वीक्रियते इति ऋषिप्रवरः लोमशः। संहिताग्रन्थानुसारं भौमः भूकम्पं जनयति रसादिं विनाशयन् अर्घतां वर्द्धयति। वस्तुतः मङ्गलस्य विभिन्न गुणदोषान् विविच्य एतत् वक्तुं शक्यते यत् केचित् अंशान् परित्यज्य मङ्गलः जीवने मङ्गलमेव विस्तारयति। मङ्गलस्य उभयोः पक्षयोः सम्यगनुशीलनं कृत्वा फलोदशः कर्त्तव्यः येन मानव समाजस्य शुभम्भूयात्।

**मुख्यशब्दः – नवग्रहः,** नृसिंहावतारः, भौमः, मानव, नृसिंहावतारः

**रामाय रामभद्राय रामचन्द्राय वेधसे।**

**रघुनाथाय नाथाय सीतायाः पतये नमः।।**

ज्योतिषशास्त्रमेकं अद्भुतं भारतीय विज्ञानमस्मिन् समस्त ब्राह्माण्डस्य गूढरहस्यानामुद्घाटन क्षमता वरीवर्ति। अस्माद् शास्त्रादेव भूस्थिताः जनाः कोटिशः प्रकाशवर्षान्तरे स्थितनक्षत्रचक्राणां तथा च ब्राह्माण्डनायकं सूर्य परितः श्रभ्यमाणानां ग्रहोपग्रहाणां स्थितिगत्यादिनां ज्ञानं कर्तुं पार्यते। एतदतिरिक्तं आकाशीयोत्पातानामपि ज्ञानं तेषां परिणामश्च सम्यग्तया अस्मात् शास्त्रादेव कर्तुं शक्यते। मुख्यत्वेन ज्योतिषशास्त्रस्य काल नियामकत्वेन वैशिष्ट्यं वर्तते यतोहि कालमानं, दिनरात्रि व्यवस्था, देवसुराणाञ्चाहोरात्रं ब्राह्मदिवसादिनां च विवेचनं अस्मादेव शास्त्रात् क्रियते। अत एव ज्योतिष शास्त्रमन्यशास्त्रपेक्षया श्रेष्ठतरमिति पूर्वाचार्यैः स्वीकृतम्।

उक्तं च–

**यथा शिखा मयूराणां नागानां मणयो यथा।**

**तदवद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्धिर्नस्थितम् ।** (वेदाङ्गज्योतिषे श्लोक संख्या 4)

निखिलं ज्योतिषशास्त्रं त्रिषुभागेषु विभक्तम् ।। तत्र प्रथमः सिद्धान्तस्कन्धः, द्वितीयः होरास्कन्धः तृतीयश्च संहिता स्कन्धः। एतेषां त्रयाणां स्कन्धनां भिन्नं भिन्नं स्वरूपं वर्तते अत्राहं संहितास्कन्ध विषये साररूपेण विवेचनं प्रस्तौमि ।

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**संहितास्कन्धः** अस्य स्कन्धस्य क्षेत्रं व्यापकम्। अत्र प्राधान्येन ग्रहाणां चारः, आकाशीयोत्पातानां लक्षणानि तेषां परिणामः, मेघलक्षणं, वृष्टिकालज्ञानं, वृष्टेः प्रमाणं, वायोः लक्षणं, अङ्गलक्षणानि, पशूनां लक्षणानि, रत्नपरिचयः, दकार्गलविधा (भूगर्भलक्षणं), वास्तु विवेचनं, पशुपक्षिणां शकुनानि मूहूर्त्ताश्च वर्णिताः सन्ति। यत्र एतेषां विषयाणां विवेचनं सा संहिता।

अत्र मुहूर्त्ताणां व्यवहारः होराग्रन्थेष्वपि अवलोक्यन्ते। मुहूर्त्ताणां सम्बन्धः प्रत्यक्ष रूपेण जनसामान्यैः सहवर्तते। अतः केचन् आचार्याः कतिपय होरा शास्त्रीय ग्रन्थेषु होराशास्त्रेण सह मुहूर्त्ताणामपि सन्निवेशः कृतः येन एकेनैव ग्रन्थेन होरा शास्त्रीयं ज्ञानं मुहूर्त्तणांमपि च युगपदेव वोधो भवेत्। वस्तुतः मुहूर्त्ताणामुल्लेखः संहिता ग्रन्थेष्वेव भवति स्म।

**समुपलब्धाः संहिताग्रन्थाः** विद्वद्भिः अनुमीयते यत् अष्टादश ज्योतिषशास्त्रप्रवर्त्तकानां अष्टादशसंहिता भवितुमर्हन्ति। तेषा गर्ग, पराशरवसिष्ठ कश्यप नारदाकृत संहिता एवोपलभ्यते। अनन्तरं आचार्य वराहमिहिर सम्पादिता भागद्वयात्मिका सुव्यवस्थिता वृहत्संहिता उपलभ्यते। जैनाचार्य सम्पादिता भद्रवाहुसंहिता अप्युपलभ्यते। मया Internet मध्ये लोमश संहिता अवलोकिता तत्राङ्गलभाषायां पञ्चैव अध्यायाः उपलभ्यन्ते। तत्रत्यः पाठोऽप्यशुद्धः । ज्योतिशास्त्रप्रशंसायां ऋषिप्रवरः लोमशः प्रतिपादपति–

**भूतं चैव भविष्यं च वर्तमानं तथैव च।**

**सर्वप्रदर्शकं शास्त्रं मोक्षकारणम् ॥**

(लोमश संहिता 4/28)

ज्योतिष शास्त्रं भूतभविष्यवर्तमानानां कालत्रय प्रदर्शकं शास्त्रं सर्वसिद्धिदं मोक्षकारकचास्ति। अग्रे नवग्रहाणां वास्तविकं स्वरूपमपि प्रदर्शयति ऋषिप्रवरः यथोक्तम्–

**दैत्यानां बलनाशाय देवानां बलवृद्धये ।**

**धर्मसंस्थापनार्थाय गृहज्जाता इमे क्रमात् ॥**

**रामावतारः सूर्यस्य चन्द्रस्य यदुनायकः**

**नृसिंहो भूमिपुत्रस्य बुद्धः सोमसुतस्य च**

**वामनो विबुधेज्यस्यभार्गवोभार्गवस्य च**

**कूर्मो भास्कर पुत्रस्य सैंहिकेयस्य शूकरः**

**केतोर्मीनावतारश्च ये चाऽन्येतेपिखेटजाः** (लो.सं. 5-39-44)

दैत्यानां बलनाशाय, देवानां बलवृद्धये, धर्मसंस्थापनार्थाय ग्रहाणां उत्पत्तिः अभवत्। सूर्यस्य श्रीरामावतारः चन्द्रस्य श्रीकृष्णः भौमास्य श्रीनृसिहः बुधस्य बुद्धावतारः वृहस्यतेर्वामनावतारः शुक्रस्य भार्गवः शनैश्चरस्य कूर्मावतारः राहोर्वराहावतारः केतोर्मत्स्यावतारः एवं ग्रहावतारणां विषये लोमश संहितायां प्रतिपादितमस्ति। एतेषु अवतारेषु भौमस्य बलावलं–

**यस्माद्विनाभूमिसुतस्य चारं शुभाशुभं यज्जगतः सुसम्यक्।**

**ना ज्ञायते ज्ञानमनुत्तमं तत्तस्मात्प्रवक्ष्यामि समासतोऽत्र ।।** (वृ.व.सं 4/1)

**अथातः संप्रवक्ष्यामि कुजचारमनुत्तमम्।**

**यतः शुभाशुभं तेनचारेणाखिलदेहिनाम् ।।** (क.सं. 4/1)

भूमिपुत्रस्य (मङ्गलस्य) चारं विना समस्त संसारस्य शुभाशुभफलानां सम्यग्तया ज्ञानं न भवति।

**स्वोदयन्निवमेऽष्टमे वा सप्तर्क्षगे वा विचरेत्प्रतीपम्।**

**तद्वक्रमुष्णाह्वयमेव तत्र वह्नेर्भयं व्याधिभयं जनानाम्।।**(वृ.व.सं. 4/2)

स्वोदय नक्षत्रात् सप्तमे अष्टमे तथा नवमे वक्रगत्या भौमः उष्णमुख संज्ञको भवति अयमेव भौमः अग्निभयं व्याधिमयञ्च करोति।

**एकादशे द्वादशभे प्रतीपे दशर्क्षगे वाश्रुमुखं प्रतीपम्।**

**तत्राश्रुवक्त्रेऽर्घ विवृद्धिपूर्वं रसादिकं नाशमुपैति नूनम्।।** (वृ.व.सं. 4/3)

उदय नक्षत्रात् दशमैकादशे द्वादशे वा ऋक्षे वक्री भूत्वा भौमः अनुमुखसंज्ञको भवति, एतादृशभौभः अर्थविवृद्धेःपूर्वमेव रसादिवाशघौमः प्रसङ्गेऽस्मिन् नारदकश्यपयोः मतसाम्यं न दृश्यते तद्यथा-

**दशमैकादशे ऋक्षे द्वादशे वा प्रतीपगे।**

**वक्रमल्पसुखं तस्मिन् तस्य वृष्टिविनाशनम् ।।** (ना.सं. 2/2)

**द्वादशैकादशे धिष्ण्ये दशमे वा प्रतीपगे।**

**वक्रमश्रुमुखं नाम रसवृष्टि विनाशनम्।।**

वसिष्ठनारदकश्यपादिः ऋषीणां मतानुसारेण वर्णितः केचन भेदापि दृश्यन्ते। मुख्यतया वक्तुं शक्यते यत् उष्णमुखा, अश्रुमुखाश्च भौमः अनिष्टमेव करोति।

**व्यालमुखभौमः**

**त्रयोदशर्थोऽपिचतुर्दशर्क्षे वक्रेकुजे व्यालमुखाभिधानम्।**

**तेभ्योभयं तत्र सुवृष्टिसस्यसमृद्धिरर्घ च जनानुरागम्।।** (वृ.व.सं. 4/4)

स्वोदयात् त्रयोदश एवं चतुर्दश नक्षत्रे वक्री भौमः व्यालमुख संज्ञकोभवति, अयमेव भौमः सर्पादि भयं सुवृष्टि, सस्यसमृद्धिञ्च, जनेषु परस्परंनुरागं च निष्पादयति। एवं विधिना भौमः रूधिरानन, असिमुशलानन संज्ञक भूत्वा सर्वदा अनिष्टमेव करोति ।

**नक्षत्रवशादुदयास्त भौमस्य फलम्**

**भूमिसुतः फाल्गुन्योरूदयं कृत्वाथ वक्रितो वैश्वे।**

**प्रजापत्येऽस्तमितः करोति निखिल धराभ्रमणम्।।**

भौमः पूर्वाफाल्गुन्यां अथवा उत्तराफाल्गुन्यां उदायनन्तरं उत्तराषाढ़ा नक्षत्रे वक्रीभूत्वा यदा पुनः रोहिण्यां अस्तंगतः तदा अयमेव भौमः समस्त भूमिं भूकम्पेन भ्रामयति ।।

प्रसङ्गेऽस्मिन् कश्यपसंहितायामपि प्रोक्तम तद्यथा–

**फाल्गुन्योरुदयं कृत्वा वक्रः स्याद्विश्वदैवते ।**

**प्रजापत्ये प्रवासश्च त्रैलोक्यं तत्र पीड़यते।।** (क.सं. 4/7)

**भौमस्य नक्षत्रवेधनस्य फलम्**

**भिनत्ति योगतारां च पितृधातृभयः कुजः।**

**तदा भूपाहवैर्भूमिर्नूनं भ्रमति चक्रवत्।।** (वृ.व.स 4/11)

भौमः यदि मघा एवं विशाखा नक्षत्रस्य वेधनं करोति तदा नृपाणां कृते हानिप्रदो भवति। निश्चयेन भूमिः चक्रवद्भ्रमति अर्थात् भूकम्पादि जनयति।

**भौमस्यमण्डल लक्षणम्** **अशोकबन्धूकमणि प्रबालसंतप्त ताम्रामलकिंशुकाभः।**

**एवं विधः सन्नुदितो महीजः शुभाय वृद्धयै भवति प्रजानाम्।।** (वृ.व.सं. 4/15)

अशोक बन्धूक मणि प्रबाल तप्तताम्रसदृशः भौमः लोकानां वृद्धिकरः सर्वदा श्रेयस्कराश्च भवति ।।

**मानवजीवनोपरि भौमस्य प्रभावः-** भौमः सृष्टोपादकः। स्त्रीणां ऋतुधर्मस्य मुख्यकारकः भौमः। प्रसङ्गोऽस्मिन् आचार्य वराहमिहिरः वृहज्जातके चतुर्थे निषेकाध्याये प्रतिपादयति तद्यथा–

**कुजेन्दुहेतु प्रतिमासमार्तवं गत तु पीडर्क्षमनुष्णदीधितौ ।**

**अतोऽन्यथास्थे शुभपुंग्रहक्षिते नरेण संयोगमुयौति कामिनी ।।** (वृ.जा. 4/1)

तरूणावस्थायाः स्त्रीणां राशिषु प्रत्येकस्मिन् मासे भौमचन्द्राद्याकाशीय ग्रहस्थिते प्रभावात् तासु ऋतुधर्मः प्रभवति! प्रातिमासिक रजोधर्म प्रभावे चन्द्रःभौमस्य प्रमुखः। युवतीनां जन्मराशितः चन्द्रःतृतीयषष्ठदशमेकदशादि राशिषु अभावात् ततोऽन्यस्थान स्थिते चन्द्रे भौमस्य दृष्टिस्यातदा गर्भधारणादयादि चन्द्रः भौमश्च प्रमुखः। युवतीनां जन्मराशितः चन्द्रः तृतीयषष्ठदशमेकादमीर[२उ] ऋतुकालो भवति । पुरुषराशौ तृतीयषष्ठदशमेकादशस्थानेषु स्थिते चले यदा पुंग्रहस्य दृष्टिस्यात्तदा गर्भधारने बालकः कन्यायाः वा सुरक्षितोत्पतिर्भवति । एभिः कारणैः भौमः प्रजोत्पत्तिकारकः ग्रहोऽस्तीति वक्तुं शक्यते ।।

**निरपत्ययोगे भौमः**

**पञ्चमेशे त्रिकस्थाने अस्तेवा रविसंयुते।**

**निरपत्याभिधो योगो भाषितो मुनिसत्तमैः ।।**[१]**।।**

**पञ्चमे भवने पापा अथवा सौम्यसूर्यजौ।**

**रोहिणो रमणो वापि तमसा सह वै भवेत्।।**[२]**।।** ज्योतिषश्यामसंग्रह (अ. 2, श्लोक 1–2)

**निरपत्ययोगे भौमस्य योगदानम्**

यदा पञ्चमेशः षष्ठाष्टमद्वादशेस्थाने भवेत् तदा एकयोगः, पञ्चमेशः अस्तंगतः सूर्येण संयुतः स्यात्तदाऽपि द्वितीययोगः, पञ्चमस्थाने सूर्यमङ्गल शनि राहु इत्यादयः पापग्रहाः तिष्ठन्ति तदा- तृतीययोगः, पञ्चमस्थाने बुधशनैश्चरयोः युतिसम्बन्धः तदा- चतुर्थ योगः, पञ्चम स्थाने राहुचन्द्रयोः युतिसम्बन्धः स्यात्तदा - पञ्चमयोगः "सुते च दशमेकोशे भूमिनन्दन संस्थितिः " - षष्ठयोगः एषु योगेषु उत्पन्नजातकस्य गृहे पुत्रो न भवति- यदि भौमः पञ्चमे दशमे द्वितीये वा भवेत्तदा मनुष्यः पुत्रहीनो भवति । जातकपारिजाते प्रतिपादितं यत् भौमः पूर्णरूपेण राजयोग कारको भवति तद्यथा-

**"चापाजसिंह भवनोदयगे धराजे मित्रक्षिते निजबलार्जित राज्यकर्ता"**

धनुर्मेषसिंहराशीनामन्यतमे लग्ने भौभे स्थिते मित्रग्रहेणदृष्टः जातकः। स्वपराक्रमेणोपार्जितस्य राज्यस्य भोक्ता भवति। अस्मिन् योगे जातो राजकुलादन्योऽपि जातः जातकः स्वपराक्रमेण राज्यमुपार्जयति।

फलदीपिकायामपि अस्मिन् सन्दर्भ लिखितमस्ति "भौमश्चेद जहरिचाप लग्नसंस्थः पृथ्वीशं कलयति मित्रखेटदृष्टः"।

**पञ्चमहापुरुषयोगाः**

**मूलत्रिकोणनिजतुङ्गगृहोपयाता भौमज्ञजीवसितभानुसुता बलिष्ठाः।**

**केन्द्रस्थिता यदि तदा रूचभद्रहंस- मालव्यचारूशशयोगकराभवन्ति ॥** (जा.पा. जात राजयोगाध्याये 49श्लोक)

बलयुक्ताः भौमज्ञ जीव-सित-भानुसुताः स्वमूलत्रिकोणं स्वोच्च स्वगृहोपयाताः सन्तो यदि केन्द्रस्थिता भवेयुस्तदा क्रमेण रूच-भद्र-हंस-मालव्य-चारूशशेति योगकराभवन्ति अर्थात् बलवान् भौमो मूलत्रिकोणच्चगृहं गतः केन्द्रवर्ती स्यात्तदा रूचकयोगः स्यात्।

**रूचक-योगस्यफलम्**

**जातः श्रीरूचके बलान्वितवयुः श्रीकीर्तिशीलान्वितः**

**शास्त्री मन्त्रजपाभिचारकुशलो राजाऽथवा तत्समः।**

**लावण्यारूणकान्तिकोमलतनुस्त्यगी जितारिर्धनी**

**सप्तत्यब्दमितायुषा सह सुखी सेनातुरङ्गाधियः॥**(जातकपारिजाते रा.यो. अध्याये 60)

रूचक्योगे उत्पन्नः जातकः बलशालिनः कीर्तिशीलश्च युक्तः शास्त्री, मन्त्रजपादि अभिचारे च कुशलः नृपः, उत वा नृपसदृशः धनधान्येन संयुक्तः शत्रुजित धनाढयः सप्ततिवर्षं यावत् राज्यसुखैश्वर्यसंयुक्तः सेनाधिपतिः वाहनयुक्तोभवति। सर्वकारस्य ये ये उच्चाधिकारिणाः सेनापतयः सन्ति तेषां जन्मकुण्डलयां योगोऽयं निश्चयेन भवति।

**विवाहे मङ्गल योगस्य विचारः**-विवाहसंस्कारे वरकन्योः जन्मकुण्डली मेलापक प्रसङ्गे मङ्गलस्य विशेषरूपेण विचारः क्रियते। अस्माकं शरीरे रक्तस्य कारकः भौमः, अतः श्रौमस्य विचारः सम्यग्तया करणीयः। सामान्यतया मङ्गलदोषस्य विचारः निम्न श्लोकानां माध्यमेन सर्वे दैवज्ञाः कुर्वन्ति-

**लग्ने व्यये चतुर्थे च सप्तमे वा कुजाष्टमे**

**भर्तारं नाशयेद् भार्या भर्ता भार्या विनाशयेत्॥** (वृहद् ज्योतिषसार)

**लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे।**

**स्त्रीणां भर्तुः विनाशः स्यात् पुंसांभार्याविनश्यति ।।** (भावदीपिका)

**लग्ने व्यये सुखे वापि सप्तमे वा अष्टमेकुजे**

**शुभ दृग्योगहीने च पतिं हन्ति न संशयम्** (वृहपराशर होराशास्त्र)

**धने व्यये च पाताले जामित्रे चाष्टमे कुजे ।**

**भार्याभर्तुः विनाशाय भर्तुश्चस्त्री विनाशनम् ।।** (अगस्त्य संहिता)

**धने व्यये च पाताले जामित्रे चाष्टमे कुजे।**

**कन्या भतुर्विनाशाय भर्तुः कन्या विनश्यति ।।** (मानसागरी)

उपरोक्त श्लोकानां सारगर्भितं अर्थं इदमेव प्रतिभाति यत् प्रथमद्वितीयचतुर्थसप्तम अष्टम द्वादश स्थानेषु स्थितः भौमः अनिष्टकरो भवति। दाम्पत्य जीवने सुखस्य ह्रासः करोति - कन्या भतुर्विनाशायभर्तुः कन्या विनश्यतीति परञ्च फलित ज्योतिष शास्त्रे मङ्गलदोषस्य अनेकानि परिहार वाक्यानि समुद्धतानि सन्ति। तद्यथा-

1. **शनिभौमोऽथवा कश्चित् पापो वा तादृशोभवेत्।**

**तेष्वेव भवनेष्वेव भौमदोष विनाशकृत् (फलित संग्रह)**

2. **भौमेन सदृशो भौमः पापो वा तादृशो भवेत्।**

**विवाहः शुभदः प्रोक्ताश्चिरायुः पुत्रपौत्रदः**

**भौमतुल्यो यदा भौमः पापो वा तादृशो भवेत्**

**उद्वाहः शुभदः प्रोक्ताश्चिरायुः पुत्रवर्धनः ।।** (ज्योतिषतत्त्व)

वरस्य यस्मिन् स्थाने भौमः तत्र एव कन्यायाः कुण्डल्यां यदि शनिमङ्गल, सूर्य राहु इत्यादयः ग्रहाः विराजते तदाऽपि भौमस्य परिहारों भवतीति न संशयः। वरकन्यो जन्मकुण्डल्यां यदा भौमस्य साम्यं भवेत्तदा विवाहे मङ्गलः मङ्गलमेव करोति।

**अन्यच्च**

**न मङ्गलीचन्द्रभृगुद्वितीये, न मङ्गली पश्यति यस्य जीवो।**

**न मङ्गलीकेन्द्रगते च राहुः न मङ्गली मङ्गलराहुयोगे।।** (मु. दीपक)

द्वितीयस्थाने चन्द्रशुक्रौ, मङ्गलोपरि देवगुरु बृहस्पतेर्दृष्टिः, केन्द्रस्थाने राहोस्थितिः, राहुमङ्गलयोर्युति सम्बन्धः स्यात्तदा मङ्गलदोषस्य परिहारो भवति ।

**केन्द्रकोणेशुभाढये च त्रिषडायेऽप्यसङ्ग्रहाः।**

**तदा भौमस्य दोषो न मदने मदपस्तथा।।** (मु.चि.)

केन्द्रे त्रिकोणे च यदि शुभग्रहाः तिष्ठन्ति तथा च तृतीय, षष्ठ एकादश भावेषु यदि पापग्रहाः तिष्ठाति तदा सप्तमेशः सप्तमे स्यात्तदा मङ्गलदोषस्य परिहारो भवति।

**"न विघटयति तुङ्ग मित्र गेहेवा" (मु.चि.)**

यदि भौमः स्वगृही, उच्चस्थः मित्रक्षेत्रस्थः स्यात् तदाऽपि भौमदोषस्य परिहारो भवति।

अनेकानि परिहार वाक्यानि सन्ति, पहरिहार वाक्यानां सम्यग्तया अनुशीलनं चिन्तनञ्च कृत्त्वा फलादेशः करणीयः। दोषास्तु वहवः सन्ति परञ्च यदि शास्त्रानुसारेण परिहारवाक्यं समुपलभ्यते तदा अनुसरणं कृत्वा निर्णयः करणीयः।। मया अनुभूयते यत् मङ्गलः कदापि अमङ्गलं न करोति वस्तुतः मङ्गलः मङ्गलमेवातनोति ।

केन योगेन भार्या भर्तुः वा मृत्युमाप्नोति, दाम्पत्य जीवेन सुखस्याभावो भवतीति विचारणीयः। ज्योतिषश्यामसंग्रह ग्रन्थे भगवतः भृगोर्वचनानि अत्र प्रस्तूयन्ते तद्यथा–

**जायेशः पापसञ्युक्तः शीर्षोदयगतोऽपिवा**

**कुजो राहुः सप्तमस्थो पाप ग्रहनिरीक्षितः।।**

**सप्तमे भवने भौमः अथवा राहुसूर्यजौ**

**दारानाथः त्रिकस्थाने पापग्रहयुतो भवेत्।।**

**योगो विलासहानिः स्याद्भार्या दुःखी भवेन्नरः ।**

**तमसः शशिकेतूनां त्रिभिर्बीजाक्षरं जपेत् ।।**

**जपं क्षिप्रं ततः कुर्याद्द्याद्दानं सुखाय वै।**

**सुवर्णं रजतं दत्त्वा ताम्रपात्रे घृतान्वितम्।।**

**न करोति यदा दानं भार्या दुःखी नरो भवेत्।**

**क्रोधपाशेन सञ्युक्तो दारहत्या कृतापुरा।।**

**यावन्न दीयते दानं तावद्भार्या न जीवति ।**

**वियोगं प्राप्यते पुंसां भृगुणा वचनोदितः ।।।**

1. सप्तमेशः पापग्रहेण संयुक्तः शीर्षोदय राश्यां गतः अर्थात् मिथुन सिंह कन्या वृश्चिक तुलाकुम्भादिषु राशिषु स्थितः सप्तमेशः एकोयोगः।
2. मङ्गलराहोर्युतिसम्बन्धः सप्तंमे, शनैश्चरसूर्ययोः दृष्टिः द्वितीयोयोगः।
3. सप्तमस्थः भौमः तृतीयोयोगः।
4. सप्तमेस्थितौ सूर्यशनैश्चरौ चतुर्थोयोगः।
5. यदा सप्तमेशः पापग्रहेण संयुक्तः षष्ठाष्टमद्वादशे वा भवेत्तदा पञ्चमोयोगः।

एते पञ्चायोगाः विलासहानिकराः योगाः वर्तन्ते विलास हानि योगे उत्पन्नस्य जातकस्य जीवनं पारिवारिक दृष्टया कष्टप्रदं भवति, कदाचिद्भार्यायाः मरणं उतवा दाम्पत्य जीवने सुखस्याभावः तथा च परस्परं वैमनस्यमेव जनयति। सप्तमेशः यत्र तिष्ठति तत्र यदुभयोः पार्श्वभावयोः पापग्रहाणां संयोगः स्यात्तदा पापकर्त्तर्यां विलासहानियोगो भवति। पाप कर्त्तरि योगे विवाहः विलम्बेन कष्टेन वा भवति – पापकर्त्तरि दोष शान्त्यर्थं उपायो विधेयः।

वृद्धवसिष्ठ, लोमश, कश्यप नारदादिसंहितानां समीक्षणेन एतत् प्रतीयते यत् मङ्गलः स्त्रीणां ऋतुधर्म प्रवर्तने सहायकः सन्तानोत्पत्तिः कारकः, सैन्यादि क्षेत्रे उच्चपद प्रदाता, सर्वकारस्य सेवा आयोगे उच्चपदाधिकारिपदे IAS, IPS, I.F.S. इत्यादौ नियुक्तिं कारयति ।

नवग्रहेषुस्थितः भौमः एवविष्णोः नृसिंहावतारः स्वीक्रियते इति ऋषिप्रवरः लोमशः। संहिताग्रन्थानुसारं भौमः भूकम्पं जनयति रसादिं विनाशयन् अर्घतां वर्द्धयति। वस्तुतः मङ्गलस्य विभिन्न गुणदोषान् विविच्य एतत् वक्तुं शक्यते यत् केचित् अंशान् परित्यज्य मङ्गलः जीवने मङ्गलमेव विस्तारयति। मङ्गलस्य उभयोः पक्षयोः सम्यगनुशीलनं कृत्वा फलोदशः कर्त्तव्यः येन मानव समाजस्य शुभम्भूयात्।

**संदर्भग्रन्थसूची:-**

1.वेदाङ्गज्योतिष

2.लोमश संहिता

3.कश्यप संहिता

4.बृहत्वशिष्ठ संहिता

5.नारद संहिता

6.बृहज्जातक

7.ज्योतिषारसंग्रह

8.जातकपारिजात

9.भावदीपिका

10.बृहत्पराशर होराशास्त्र

11.अगस्त संहिता

12.मुहूर्त चिन्तामणि

13.मुहूर्त दीपक